# Bhuvi Vijayate TirtharajaprayagaH

# ભુવિ વિજયતે તીર્થરાજપ્રયાગઃ

## Document Information

Text title : bhuvi vijayate tIrtharAjaprayAgaHtIrtharAjaprayAgaH

File name : tIrtharAjaprayAgaH.itx

Category : misc, tIrthakShetra

Location : doc_z_misc_general

Transliterated by : Deepakshi Kumar

Proofread by : Deepakshi Kumar

Latest update : September 8, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

Bhuvi Vijayate TirtharajaprayagaH

# ભુવિ વિજયતે તીર્થરાજપ્રયાગઃ

શાન્તો દાન્તો મુનિરિવ તપઃ પૂતમૂર્તિઃ પ્રશાન્તઃ
    સૌમ્યો રમ્યો વિશદવસુધા-મૌલિમાલાયમાનઃ ।
તૂર્ણં પુણ્યં દિશતિ નિયતં સ્વાન્તમભ્યાગતાનાં
    ભવ્યો દિવ્યો ભુવિ વિજયતે તીર્થરાજઃ પ્રયાગઃ ॥ ૧॥

સ્વચ્છચ્છાયોત્થિતપુલિનકં કઞ્જકુઞ્જાવદાતં
    કમ્બુપ્રાયપ્રચલમકરં યસ્ય વારાં વિતાનમ્ ।
વારં વારં યદમૃતપયઃ પાનપુષ્ટીકૃતાઙ્ગાઃ
    સઙ્ગાદ્યસ્યામિત-જનિસુખં કેઽપિ ચાન્તે લભતે ॥ ૨॥

પ્રાચ્યાં યસ્યાનુપમિતપુરી કાશતે કાશિકાઽસૌ,
    સૌખ્યાસારં વપુષિ દધતી કર્ણપૂઃ સા પ્રતીચ્યામ્ ।
આચામન્તી નિખિલકલુષં કાચિદમ્બાઃ હ્યવાચ્યાં,
    યસ્યોદીચ્યાં કલકલરવો જન્હુકન્યાપ્રવાહઃ ॥ ૩॥

ગઙ્ગામ્ભોભિર્મિલિત-યમુનાઽન્તસ્સરસ્વત્યમન્દ-
    સ્યન્દૈર્યસ્ય પ્રણવમહિમોદ્ભાસિકા યસ્ય કીર્ત્યા ।
તીર્થઃ સમ્યક્ સલિલભરિતૈશ્ચૈકમત્યેન તૈઃ પ્રાક્-
    સમ્ભૂયદ્રાક્ સ્વયમતુલિતસ્તીર્થરાજીકૃતો યઃ ॥ ૪॥

તસ્ય પ્રાચાં મુદિતમનસાં દેવતાનાં મુનીનાં
    આવાસેન પ્રથિત-યશસઃ પૂર્ણ-કુમ્ભાભિષેકે ।
સદ્યઃ સ્નાનાદ્ ભરતતટિની-સઙ્ગમાદમ્બુપાનાદ્,
    ધન્યાત્માનઃ સુકૃતમતનુ-પ્રાપ્તુકામા યતન્તે ॥ ૫॥

– ડૉ. શિવજી ઉપાધ્યાયઃ
(સાહિત્ય પ્રાધ્યાપકાઃ સં સં. વિ. વિ. વારાણસી)

Encoded and proofread by Deepakshi Kumar

*Bhuvi Vijayate TirtharajaprayagaH*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*